श्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति ॥ तत्र मारुतात्परिशुष्कारुणवर्णानि विषममध्यानि कदम्बपुष्पतुण्डिकेरीनाडीमुखसूचीमुखाकृतीनि च भवन्ति । तैरुपहतः सशूलं संहतमुपवेश्यते कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्य वेदना गुल्माष्ठीलाप्लीहोदराणि चास्य तन्निमित्तान्येव भवन्ति, कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति। पित्तान्नीलाग्राणि तनूनि विसर्पीणि पीतावभासानि यकृत्प्रकाशानि शुकजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति तैरुपहतः सरुधिरमतिसार्य्यते ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति, पीतत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति । श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि वृत्तानि स्निग्धानि पाण्डूनि करीरपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति कण्डूबहुलानि च भवन्ति तैरुपहतः सश्लेष्माणमनल्पं मांसधावनप्रकाशमतिसार्य्यते शोफशीतज्वरारोचकाविपाकशिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति, शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढपुरीषप्रपीडितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक् सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति ॥ सन्निपातजानि सर्व्वदोषलक्षणयुक्तानि ॥ सहजानि दुष्टशोणितशुक्रनिमित्तानि तेषां दोषत एव प्रसाधनं कर्त्तव्यं विशेषतश्चात्र दुर्द्दर्शनानि परुषाणि पाण्डूनि दारुणान्यन्तर्मुखानि तैरुपद्रुतः कृशोऽल्पभुक् सिरासन्ततगात्रोऽल्पप्रजः क्षीणरेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्घ्राणशिरोऽक्षिश्रवणरोगवान् सततमन्त्रकूजाटोपहृदयोपलेपारोचकप्रभृतिभिः पीड्यते ॥" "अर्श आद्या महारोगा अतिपापाद्भवन्ति हि" । शाता०स्मृ०। पृषो०सलोपः । अर्शमप्यत्र न० ।

**अर्शस** त्रि० अर्शस्—अस्त्यर्थेऽच् । वलिकाकारगुह्यव्याधियुक्ते । "हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम्" मनुः ।

**अर्शसान** त्रि०ऋश—असानच् सुट् च । बाधके हिंसके "अव प्रियमर्शसानस्य" ऋ०२,२०६ "अर्शसानस्य बाधमानस्य" भा० न्यर्शसानमोषति ऋ०१०।३०,८ २मन्दे हास्ये "इन्द्रः सूर्य्यस्य रश्मिभिर्न्यर्शसानमोषति ८,१२९, "अर्शसानं बाधमानं मन्दे हास्यमसुरम्" भा०। [ङीप् ।

**अर्शिन्** त्रि० अर्शमस्त्यस्य इनि । अर्शोरोगयुक्ते स्त्रियां

**अर्शोघ्न** पु०अर्शो हन्ति हन–ट । (ओल) १सूरणे, २भल्लातके च ३ अमनुष्यकर्त्तृकार्शोहननकारकमात्रे त्रि० "अर्शोघ्नं कारभं मूत्रं मानुषञ्च विषापहम्" "यच्चान्यदपि स्निग्धमर्शोघ्नमसृष्टमूत्रपुरीषञ्च तदुपसेवेत" इति च सुश्रुतः । स्त्रियां ङीप् । सा च तालमूल्याम् मेदि०

**अर्शोहित** पु० अर्शसि हितः सेवनेन तन्नाशकत्वात् ७त० । १भल्लातके । २अर्शोरोगहितकारकमात्रे त्रि० अहित इति च्छेदे ।३तत्राहितकरे त्रि० ।

**अर्षण** न० ऋष–गतौ भावे ल्युट् । १गमने करणे ल्युट् । २गमनसाधने स्त्रियां ङीप् । "याः सीमानं विरुजन्ति मूर्द्धानं प्रत्यर्षणीः अथ० ९,१८,१२ ।

**अर्ह** योग्यत्वे भ्वा० पर० अक० सेट् । अर्हति आर्हीत् आनर्ह लोके, वेदे तु आनर्ह । प्राप्तियोग्यतार्थे गतौ च सक० । अर्ही अर्हितः अर्हितुम् अर्हित्वा अर्हणम् अर्हन् "हित्वाण्यहान्यर्हसि सोढुमर्हन् !" रघुः। "गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति" मनुः । "दण्डमर्हति माषकम् मनुः । स तस्माल्लब्धुमर्हति" स्मृतिः "तथापि त्वं महाबाहो नैनं शोचितुमर्हसि" गीता । क्वचिदस्यात्मनेपदित्वम् व्यत्ययेन। "सलिलं नार्हसे प्राज्ञ ! दातुमेषां हि लौकिकम्" "रावणो नार्हते पूजाम्" इति च रामायणम् ।

**अर्ह** पूजने चुरा०उभ०सक०सेट् ।अर्हयति ते आर्जिहत् त । "राजार्जिहत्तं मधुपर्कपाणिः" भट्टिः । अर्हयामास । अर्हणा अर्हयन् अर्हयितुम् अर्हयित्वा । "स्रग्विणं तल्पमासीनमर्हयेत् प्रथमं गवा" मनुः । पूजनं च स्तुतिनतिप्रभृतिभिः सम्माननम् । अभि+आभिमुख्येन सम्मानने । "अभ्यर्हितञ्च" का० वार्त्ति० ।

**अर्ह** पु०अर्हते चु०अर्ह कर्म्मणि यत् । पूजास्तुत्यादिभिराराध्ये १ईश्वरे २शक्रे च । ३पूजनीये त्रि० "अर्हानभोजयन् विप्रो दण्डमर्हति माषकम्" मनुः ४ विष्णौ पु० । "अभिप्रायः प्रियार्होऽर्हः" विष्णुस० । "पूजास्तुतिनमस्कारादिभिः पूजनीय इत्यर्हः" भा० । भावे घञ् । ५पूजने । अर्हति भ्वा० अर्ह–कर्त्तरि अच् । ६योग्ये त्रि० । "तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् स्वबान्धवान्" गीता । 'अर्होऽसि कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम्" रामा०। "नियुक्तायामपि पुमान् नार्य्यां जातोऽविधानतः । नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः" मनुः आर्षत्वात् कर्म्मणि न षष्ठी 'पूजार्हावरिसूदन" गीतायान्तु "कर्म्मण्यण्" अण् उप० स० । भावे घञ् । ७गतौ ८योग्यत्वे धातूनामनेकार्थत्वात् द्रव्यक्रययोग्यत्वाच्च अर्ह–कर्मणि घञ्